Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

संस्कृत-साम्प्रतम्
(Sampratam means "Current")
(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२६
फेब्रुआरी - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मानवानां महाप्रस्थानम्

प्रथमे विश्वयुद्धे समाप्तिं गते, १९१८ तमे वर्षे युरोपदेशेषु इन्फ्लुएन्झानामकः रोगः प्रसृतः। विश्वव्याप्तेन तेन रोगेण चतुष्कोटिः मनुष्याः यमसदनं प्रापिताः। ह्यः एव ननु 'कोरोना' विषाणुभिः नैके जनाः प्राणैः वञ्चिताः। एवमेव कोऽपि प्रबलः रोगः भविष्यत्काले सकलं मनुष्यवर्गं नाशयेत् चेत् ...? अस्मिन् महीतले सम्पूर्णा मावजातिः नष्टा भवेत् इति चिन्तनं बुद्धेः वृथा श्रमः एव। तथापि एकं प्रमाणं वयम् अपाकर्तुं न शक्नुमः। ग्रीवां किञ्चित् भ्रामयित्वा प्राचीनां घटनां पश्यामः। २५ कोटिवर्षेभ्यः पूर्वम् अग्निपर्वतस्य प्रकोपेन ९८% जीवसृष्टिः विलयं गता। दिष्ट्या अवशिष्टाः २% सजीवाः नूतनतया सृष्टेः निर्माणं कृतवन्तः। इदानीं चिन्तयन्तु भवन्तः। किं सा घटना पुनः भवितुं नार्हति ? एषः प्रश्नः अत्रैव तिष्ठतु। अपरं प्रश्नं प्रति विचारं कुर्मः। यदि मानवजातिः समूलं नश्यति, तर्हि भूतलस्य स्वरूपं कीदृशं भवति ? एषः प्रश्नः निश्चयेन रोमहर्षं जनयेत्।

मानवरहिता पृथ्वी कीदृशी भवेत् ? अस्य प्रश्नस्य उत्तरं वयम् अपि दातुं शक्नुमः। परन्तु अस्माकम् उत्तरस्य वैज्ञानिकं मूल्यं शून्यमेव। विज्ञानिनः अस्मिन् विषये किं चिन्तयन्ति ? एष प्रश्नः अपि रोमहर्षं जनयेत्! अस्तु, सज्जाः भवन्तु भवन्तः। अद्य विज्ञानिभिः सह यात्रां कुर्मः। मानवजातिः 'गूड बाय' उक्त्वा दिवङ्गता। अनन्तरं सूर्यः अस्तं गच्छति। अपरस्मिन् दिवसे 'मानवजातिः नास्ति' इति अन्तरीक्षे भ्रमन्तः उपग्रहाः जानन्ति। एतेषु उपग्रहेषु एव प्रतिबिम्बितं भवति यत् भूतले पूर्वं प्रकाशमानाः विद्युद्दीपाः शनैः शनैः प्रशाम्यन्ति। यतो हि बृहतां विद्युद्गृहाणाम् (थर्मल पावर स्टेशन) अवेक्षकः (रक्षकः) कोऽपि मनुष्यः नास्ति। पवनचक्राणि, सौर्यस्थानानि वा कञ्चित् कालं प्रवर्तन्ते। तत्पश्चात् पृथ्वी अन्धतमसे निमज्जति। वक्तुं शक्यते यत् विद्युत्कालः (सः १९ तमे शतके प्रारब्धः आसीत्) अस्तं गच्छति।

या भूगर्भस्य, सरोवराणां, नदीनां च जलस्य यथेच्छं व्ययं करोति सा मानवजातिः इदानीं नास्ति। अतः भूजलस्य स्तरः वर्धते। परिणामतः पातालशायिनः मूषकाः महता प्रमाणेन (बहिः) निर्गच्छन्ति। ते मानवशून्येषु आपणेषु आक्रमणं कुर्वन्ति। तत्र खाद्यवस्तूनि भक्षयन्तः ते मानवानां शवेषु अपि उत्साहं प्रदर्शयन्ति। सुलभेषु खाद्यवस्तुषु, मूषकाणां स्वभावतः एव प्रजननम् अपि वर्धते। अतः कतिपयेषु सप्ताहेषु कोटिशः मूषकाः नगरेषु शासनं कुर्वन्ति।

यानानि, यन्त्रशालाः, इतराणि प्रदूषणसाधनानि च मासात् पूर्वमेव प्रशान्तानि वर्तन्ते। तेन वायुशुद्धिः शनैः शनैः जायते। मासत्रयात् अनन्तरं तु नक्षत्राणां तेजः विशेषतः अभिव्यक्तं भवति। दूरस्थाः पर्वताः स्पष्टं दृश्यन्ते। परन्तु एतत् मनोहारि चित्रं वर्णयितुं सम्प्रति कोऽपि कविः नास्ति इति न विस्मरणीयम्। संवत्सरे समाप्तिं गते, भवनानां क्रमः

(अनुसन्धानम् ५ पृष्ठे...)

# अमृतस्य अन्वेषणम्

**– जातककथा**



ब्रह्मदत्तः यदा काशीराज्यं पालयन् आसीत् तदा सामन्तस्य चिरायुषः आस्थाने नागार्जुननाम्ना मुख्यमन्त्रिस्थानं विभूषितवान् आसीत् बोधिसत्त्वः।

नागार्जुनः दयालुः महादाता च । रसायन-शास्त्रे औषधविज्ञानक्षेत्रे च पारं गतः अपि आसीत् सः । सः रसायनप्रयोगद्वारा रहस्ययोगं कञ्चित् आविष्कृत्य राज्ञः स्वस्य च मरण-सम्भवं निवारितवान्।

कदाचित् तदीयः प्रियः पुत्रः सोमदेवः अल्पे एव वयसि आकस्मिकतया मरणं प्राप्तवान् । एतस्मात् नागार्जुनः महत् दुःखं प्राप्तवान्।

स तु स्वभावेन दयामयः आसीत्। अतः सः अचिन्तयत् – 'एतत् मरणं सहजतया बान्धवानां दुःखस्य कारणं भवति। प्रियः जनः यदा मरणं प्राप्नोति जनाः बहुधा विलपन्ति। मरणस्य निवारणाय कमपि मार्गं न जानन्ति ते। किन्तु तत् सोढुम् अपि सामर्थ्यं न भवति तेषाम्। अतः यदि एतत् मरणम् एव निवार्येत तर्हि कस्यापि दुःखं न भवेत्। अतः मरणनिवारणाय मया कोऽपि उपायः चिन्तनीयः' इति।

किञ्चित् चिन्तनं यदा कृतं तदा तस्य मनसि विचारः आगतः 'रसायनप्रयोगः अधिकव्ययकारी । अतः सामान्यानां जनानाम् उपयोगाय मया किमपि करणीयम् । मूलादीनां साहाय्येन अमृतं मया निर्मातव्यम् । तदा एव सामान्याः जनाः कष्टानि निवारयितुं मार्गं प्राप्नुयुः' इति।

एवं विचिन्त्य सः विविधानाम् औषधानां सहयोगेन अमृतस्य निर्माणाय प्रयत्नम् आरब्धवान्। स्वस्य समग्रं शास्त्रज्ञानं, बुद्धिमत्तां च उपयुज्य सः बहुविधान् प्रयोगान् कृतवान्। अन्तिमः घट्टः अपि तेन प्राप्तः अमृतकल्पनामकं मूलं प्राप्तं चेत् इष्टं सिद्धम् इव इति सः अचिन्तयत्।

अत्रान्तरे एषा वार्त्ता इन्द्रेण श्रुता । इन्द्रः अश्विनीदेवते आहूय अवदत् – "भवन्तौ अद्यैव भूलोकं गत्वा नागार्जुनस्य अमृतयोगस्य पूर्णतां स्थगयताम्। साम-दाम-दण्ड-भेदेषु कस्यचित् वा उपयोगः क्रियताम्। तदीयं कार्यं स्थगितं भवेत्। अग्रिमं परिणामम् अहं चिन्तयिष्यामि" इति।

एताम् आज्ञां पालयन्तौ अश्विनीकुमारौ वेषान्तरं धृत्वा भूलोकं गतवन्तौ । नागार्जुन-समीपं गत्वा कुशलप्रश्नादिकं पृष्ट्वा तौ अवदताम् – "मन्त्रिवर ! राज्यशासनम् एव अन्यथाकर्तुम् अपि समर्थेन भवता अविदितं किम् अस्ति ? एतादृशः भवान् ब्रह्मणः सङ्कल्पम् एव विरोद्धुं प्रयतमानः अस्ति यत् तत् तु महते आश्चर्याय। मानवजातेः धर्मगतिः भवति मृत्युः । अमृतसिद्धिद्वारा सः एव भवता अवरुद्धः यदि भवेत् तर्हि किं सृष्टिनियमाः विपर्यस्ताः न भवेयुः ? यदि मानवेषु कस्यापि मरणम् एव न भवेत् तर्हि मानववासाय कियन्तः लोकाः अपेक्षिताः भवेयुः ! देवैः यत् कार्यं करणीयं तत् भवता क्रियते यत् तत् किम् औचित्यम् आवहत् ? भवतः पुत्रवियोगं निमित्तीकृत्य साहसकार्ये प्रवृत्तिः

सर्वथा न शोभते'' इति।

एतेषां वचनानां श्रवणात् अपि नागार्जुनस्य सङ्कल्पः शिथिलतां न गतः। किन्तु तस्य मनसि सन्देहः तु उत्पन्नः – मया क्रियमाणम् उचितम् उत न इति।

अत्रान्तरे राजा चिरायुः पुत्रं जयसेनं युवराजपदे नियोक्तुं सन्नाहम् आरब्धवान्। शुभे मुहूर्ते आस्थानं सभासद्भिः पूर्णं जातम्।

तदवसरे वृद्धब्राह्मणवेषेण आगतः इन्द्रः जयसेनसमीपं गत्वा रहसि अवदत् – ''वत्स! भवतः पितुः मरणं वार्धकं वा नास्ति इति किं भवान् न जानाति? अतः भवता आजीवनं युवराजत्वेन एव स्थातव्यं भविष्यति। सिंहासनं भवता कदापि न प्राप्स्यते'' इति।

एतत् श्रुतवतः जयसेनस्य मुखं म्लानं जातम्। तदा वृद्धब्राह्मणरूपी इन्द्रः पुनः अवदत् – ''वत्स! भवता एतद्विषये चिन्ता करणीया नास्ति। भवतः इच्छायाः पूर्त्यै अस्ति कश्चन सरलः उपायः। भोजनात् पूर्वं यः यत् याचति तत् तस्मै ददाति सः। आ बहोः कालात् तेन पाल्यमानः नियमः एषः। अतः भवता तत्समीपं गत्वा तदीयं शिरः एव याचनीयम्। अग्रे यत् भविष्यति तद्विषये अहं चिन्तयिष्यामि'' इति।

राज्यलोभेन आक्रान्तः जयसेनः तस्मिन् एव दिने भोजनात् पूर्वं नागार्जुनसमीपं गत्वा वृद्धस्य आदेशस्य अनुगुणं तदीयं शिरः अयाचत। एतत् श्रुतवान् नागार्जुनः पुनश्चिन्तनं किमपि अकुर्वन् जयसेनाय खड्गं दत्त्वा अवदत् – ''वत्स! अलं भीत्या। भवान् एतेन खड्गेन मम शिरः कर्तयतु तावत्'' इति।

रसायनस्य प्रभावस्य कारणतः नागार्जुनस्य शिरः वज्रसमं जातम् आसीत्। अतः जयसेनः बहुवारं खड्गेन बलात् प्रहारं कृतवान् चेदपि नागार्जुनस्य शिरः तु कर्तितं न जातम्।

एतां वार्त्तां ज्ञातवान् राजा धावन् आगत्य पुत्रस्य प्रयत्नस्य निवारणाय उद्युक्तः। तदा नागार्जुनः अवदत् – ''महाराज! युवराजेन या अपेक्षा प्रकटिता तस्याः पूर्वापरादिकम् अहं सम्यक् जानामि। जयसेनः तु प्रवर्तिष्यमाणस्य निमित्तमात्रम्। अतः मया तस्य प्रयत्नस्य निरोधः न कृतः। पूर्वषु जन्मसु मया नवनवतिवारं निराकरणं विनैव शिरसः कर्तनम् अङ्गीकृतम् आसीत्। एषः तु शततमः अवसरः। एतदवसरे किमर्थं वा मया निराकरणं प्रदर्श्येत? अहम् अपयशसः भाजनं भवितुं न इच्छामि। कृपया भवता अत्र सहकरणीयम्'' इति।

एतावत् उक्त्वा सः राजानम् अन्तिमतया प्रीत्या आलिङ्गितवान्। ततः स्वस्य स्यूततः किञ्चन मूलम् अपनीय ततः रसम् उत्पाद्य तेन रसेन खड्गं विलिप्य सः जयसेनम् अवदत् – ''वत्स! इदानीं भवान् मम शिरः कर्तयितुम् अर्हति'' इति।

जयसेनेन पुनरपि यदा खड्गे प्रहारः कृतः तदा नागार्जुनस्य मुण्डं रुण्डात् पृथग्भूतं सत् भूमौ अपतत्।

एतत् घोरं दृश्यं द्रष्टुम् अशक्नुवन् राजा अपि प्राणत्यागाय सन्नद्धः जातः। तदा भूमौ पतितात् शिरस्तः ध्वनिः श्रुतः – ''राजन्! अलं चिन्तया। सर्वेषु अपि जन्मसु अहं भवता सह भविष्यामि'' इति।

एतदनन्तरं राजा पूर्णतः विरक्तः जातः। सः राज्यभारं पुत्राय अर्पयित्वा तपस्यार्थम् अरण्यं प्रति निर्गतवान्।

एवं जयसेनेन राज्यं प्राप्तम्। इन्द्रस्य तन्त्रं च सफलं जातम्।

# बालचरितम् ( ग्रन्थपरिचयः )

व्योम शाहः

**अनुवर्तते**

श्रीकृष्णस्य बाल्यकालम् अधिकृत्य महाकविभासप्रणीते बालचरिते एतावता अस्माभिः इयान् वृत्तान्तः दृष्टः – प्रथमे अङ्के तावत् नारायणः स्वयं देवक्याः गर्भे अवातरत्। कालेन तस्य जन्म अभवत्।

तं परिरक्षितुं वसुदेवः यमुनाम् उत्तीर्य तं नन्दगोपाय समर्पयति स्म । तत्र च नदीतीरे स्थितां नन्दगोपस्य दारिकां गृहीत्वा सः पुनरपि मथुरां प्राप्नोत्। द्वितीयेऽङ्के तावत् – कंसः स्वप्ने अशुभानि लक्षणानि अपश्यत्। प्रतिहार्याः वचनेन कंसः ज्ञातवान् यत् देवकी पुत्रीं प्रसूतवती । तृतीयेऽङ्के तावत् – प्रवेशकमाध्यमेन बालरूपस्य नारायणस्य बाललीलानां बहूनां च दानवानां संहारस्य वृत्तान्तः सूचितः । ततः अरिष्टवृषभेण सह युद्धं समुपवर्णितम्। चतुर्थेऽङ्के तावत् – दामोदरः यमुनातटं गतवान्। तत्र नदीं प्रविश्य कालियं नागं दृष्टवान्। तयोः संलापः भवति, क्रमेण च तस्य प्रशान्तिपूर्वकं समाप्तिः भवति।

पञ्चमाङ्कस्य प्रारम्भः कंसेन भवति। सः दामोदरं हन्तुं प्रकल्पान् समायोजयति। सङ्कर्षणेन सह दामोदरः नगरं प्रविश्य रजकेभ्यः वस्त्राणि आछिद्य गृहीतवान्। एतत् श्रुत्वा महामात्रेण गन्धहस्ती प्रेषितः । अचिरात् वृत्तान्तम् आप्तं यत् सः गजः हतः । सः एकां कुब्जाम् अकुब्जां कृत्वा धनुःशालां प्रति चलितः । नृपः वृत्तान्तं ज्ञातुं भटं प्रेषयति। सः न्यवेदयत् यत् धनुःशालारक्षकस्य कर्णमूले प्रहृत्य धनुः गृहीत्वा द्विधा अकरोत्। ततः चाणूरमुष्टिकौ प्राविशताम्।

दामोदरं हन्तुम् उत्सुकौ उभौ अपि कंसं वन्दित्वा कथयतः यत् तौ विविधैः प्रहारैः युद्धविशेषैः च निश्चयेन तं बालं दामोदरं हनिष्यतः। ततः दामोदरः प्रविश्य कंसं हन्तुं स्वीयं निश्चयं प्रकटयति–

**मर्त्येषु जन्म विफलं मम तानि घोषे कर्माणि चाद्य नगरे धृतये न तावत् ।**
**यावन्न हंसहतकं युधि पातयित्वा जन्मान्तरासुरमहं परिकर्षयामि ॥**

सङ्कर्षणोऽपि तथैव योद्धुं सज्जः । चाणूरमुष्टिकयोः सङ्कर्षणदामोदराभ्यां युद्धे वधः कृतः । ततः दामोदरः कंसं शिरसि गृहीत्वा पातयति । तत्र कंसः हतः । ताभ्यां सङ्कर्षण–दामोदराभ्यां योद्धुं सैन्यं सज्जम् । यावता कालेन सङ्कर्षणः गत्वा तत् वारयति तावता वसुदेवः स्वयं प्रविश्य घोषयति यत् तौ तस्यैव पुत्रौ।

**ज्येष्ठोऽयं मम तनयस्तु रौहिणेयो देवक्यास्तनयमिमं च किं न वित्थ ।**
**संरम्भं त्यजत किलायुधैश्च कार्यं कंसार्थं स्वयमिह विष्णुराजगाम ॥**

वसुदेवः भटान् आज्ञापयति यत् उग्रसेनः कारागृहाद् मोच्यः मथुराधिराजरूपेण च स्थापनीयः दामोदरस्य कंसहतकस्य पूजार्थं देवाः समागताः । नारदोऽपि प्रभुं वन्दितुं समागमत् । अर्घ्यं पाद्यं च गृहीत्वा तुष्टः गन्धर्वादिभिः सह पुनरपि भूलोकात् प्रयाणं करोति। नाटकस्य समाप्तिः भरतवाक्येन भवति।

"इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम्। महीमेकातपत्राङ्का राजसिंहः प्रशास्तु नः ॥"

**मूलकृतेः परिवर्तनानि** – अस्य कृतेः मुख्या आधारसामग्री न ज्ञायते अतः मूलात् किं परिवर्तितम् इति सम्यग् अवबोद्धुं न शक्यते । तथाऽपि इदं सुस्पष्टं यत् यमुनायाः जलस्य द्विधा छिन्नत्वं तु कवेरेव मौलिकी कल्पना । महाभारते पुराणादिषु च दामोदरः सप्तमः पुत्रः नन्दगोपस्य च पुत्री मृता न आसीत्।

**( समाप्तम् )**

## मानवानां महाप्रस्थानम्

समायाति। भवनानाम् आयुष्यं सामान्यतः ७५ वर्षात्मकं मीयते। तत् तु तेषां यथाकालं परिष्कारः क्रियते चेत् सम्भवति। परिष्कर्ता धरातले कोऽपि नास्ति। अतः पिप्पलादयः वनवृक्षाः भित्तीनां लघुषु छिद्रेषु पदं कुर्वन्ति। वृक्षाणां प्रसृतैः दृढैः मूलैः भवनानां शैथिल्यं वर्धते। मनुष्यः विद्यते चेत् पूर्वतः विचिन्त्य मूलच्छेदं करोति। परन्तु तत् कर्तुं मनुष्यः सम्प्रति उपस्थितः नास्तिः। मूलानां शक्तिवर्धनेन सह भवनानां ध्वंसनं वेगं प्राप्नोति। एवमेव मार्गान् अपि वन्याः वनस्पतयः नाशयन्ति। दश वर्षाणि व्यतीतानि। भूम्याः स्वच्छतां कर्तुं कोऽपि मनुष्यः नास्ति। तेन कारणेन वृक्षेभ्यः पतितानां पर्णानां राशिः अविरतं वर्धते। वनं स्वानि अङ्गानि शनैः शनैः विस्तारयति। एतस्याः प्रक्रियायाः अगतिः न विद्यते। सामान्यतः विविधानां जन्तूनां वासस्थानानि मनुष्यः एव नाशयति। परन्तु सः मनुष्यः सुरलोके विराजते। मानवरहितं सकलं धरातलं जन्तूनाम् अधिकारे तिष्ठति। अथ निरङ्कुशानां सिंह–व्याघ्र–वृक–शृगालादीनां सञ्चारः आरभ्यते, प्रतिक्षणं च वर्धते। समुद्रवासिनां जन्तूनां प्रमाणम् अपि समस्थितिं प्राप्नोति। यतो हि मत्स्यादीनाम् आदिशत्रुः मनुष्यः इदानीं नास्ति। अन्यत्र, मनुष्यैः चिरात् पालिताः अश्व–वृषभ–महिष–मेष–गर्दभ–शुनकादयः पशवः पक्षिणः च पोषणाभावेन क्षीणतां यान्ति।

एषा प्रक्रिया शतं वर्षाणि निरन्तरं प्रवर्तते। तदा विविधाः कीटाः भूम्याः नवीकरणे व्यापृताः भवन्ति। मानवैः (रसायनैः) प्रदूषिता भूमिः कालक्रमेण प्राकृतिकं स्वरूपं धारयति। मनुष्यैः पूर्वं पालितेषु पशुषु, ये जीवन्ति, तेषाम् उत्क्रान्तिक्रमः किञ्चित् दिशां परिवर्तयति। ते आदिपशूनां रूपं धारयितुं सज्जाः भवन्ति। अद्य ग्राम्याः वन्याः च पशवः भिन्नाः दृश्यन्ते। ते सर्वे समानाः (वन्याः एव) भवन्ति। यथा मनुष्यैः पालिताः शुनकाः पक्वानि खाद्यानि परित्यज्य मांसाहारे प्रवृत्ताः भवन्ति। तेषां चापल्यम्, दृष्टिसामर्थ्यम्, धावनकौशलम् इत्यादयः गुणाः वर्धन्ते। यथास्थिति तेषां स्वभावे, वर्तने, शरीरे च महत् परिवर्तनं जायते। धान्येषु अपि उत्क्रान्तिः विपरीतक्रमेण अवतरति। अद्य जायमानाः गोधूम–तण्डूल–त्रिपुट–चणकादयः पुनः तृणधान्यरूपेण परिवर्तन्ते। (कोटिशः वर्षेभ्यः पूर्वं धान्यानां रूपं तदेव आसीत्।) दशसहस्रवर्षेभ्यः अनन्तरं 'ग्लोबल वोर्मिंग' सर्वतः प्रस्थानं करोति। कारणम्, पृथिव्याः $CO_2$ मात्रायाः स्थितिः अपेक्षितं स्तरं प्राप्नोति। तेन सह पृथिव्याः तापः अपि २.५° अपचीयते। एतत् वर्धमानं शैत्यं हिमयुगस्य द्वारम् उद्घाटयति। अथ हिमकणाः पृथ्वीम् आच्छादयितुम् उत्तरभागतः प्रारम्भं कुर्वन्ति। एवं हिमस्य प्रचण्डः प्रवाहः मानवसंस्कृतेः अवशिष्टान् सर्वान् स्मृतिचिह्नभूतान् पदार्थान् अवकृष्य 'कालोऽस्मि लोकक्षयकृत्' इति गीतावचनं सार्थकं कुर्वन् महासागराय समर्पयति। एवमेव कोटिः वर्षाणि मानवैः विना एव व्यतीतानि भवन्ति। वस्तुतः उत्क्रान्तेः प्रथमे सोपाने मानवः एव 'स्वयमेव मृगेन्द्रता' इव सकलसत्त्वाधिपतिः भवति। सः नास्ति। ततः अन्ये सजीवाः परस्परं स्पर्धन्ते। कस्मिन् विषये ? मानवात् अनन्तरम् उत्क्रान्तेः सोपानक्रमे श्रेष्ठः (आदिः) कः ? इति। व्यक्तम् एव। चिम्पाञ्जीनामा वानरः प्रथमं क्रमं प्राप्तुम् अर्हति। कारणं तस्य मानवेन ९८% जेनेटिकसाम्यं दृश्यते। सः वानरः अद्य यावत् मनुष्यः भवितुं समर्थः न अभवत् इति तस्य दुर्भाग्यम्! अथ तस्य अवसरः समायातः। सः वानरः मानुषं रूपं प्रति प्रयाणं करोति।

अस्मिन् धरातले कोटिशः वर्षेभ्यः पूर्वम् (आदिमानवेभ्यः अपि पूर्वम्) डायनोसोरनामकं किमपि सत्त्वं सञ्चरति स्म इति अद्यतनाः विज्ञानिनः तर्कयन्ति। हास्यास्पदम् अवश्यं भवेत्, तथापि साहसेन वक्तुं शक्यते यत्, एते चिम्पाञ्जीजातीयाः वानराः बहुभ्यः वर्षेभ्यः अनन्तरं, मनुष्याः भूत्वा, मनुष्याणां प्राचीनान् अस्थिसमूहान् अन्विष्य घोषणां कुर्युः – 'कोटिशः वर्षेभ्यः पूर्वं भिन्नाः सजीवाः पृथिव्यां वसन्ति स्म। तेषाम् आहारः कीदृशः स्यात् ? वयं महता यत्नेन अपि सैद्धान्तिकं निर्णयं कर्तुं न शक्नुमः!'

## कृपया हसन्तु

**नमनः रमणम् आङ्ग्लभाषां पाठयन् आसीत् । एकस्मिन् दिने मध्याह्ने रमणः नमनम् उद्दिश्य - “भोः ‘dinner’ स्वीकरोतु” इति अवदत् । एतत् श्रुत्वा नमनः कोपेन - “भोः मूर्ख ! अधुना ‘lunch’ इति वक्तव्यं न तु ‘dinner’ इति । एत् श्रुत्वा रमणः अवदत् “महोदय ! एतत् अवशिष्टं ह्यस्तन - रात्रिभोजनं वर्तते । अतः ‘dinner’ स्वीकरोतु इति वदन् अस्मि ।”**

★ ★ ★ ★ ★

**पतिः - (पत्नीम् उद्दिश्य) भोः पिपासा अस्ति, कृपया जलं ददातु ।**

**पत्नी - भोः अद्य अहं भवतः कृते भवतः प्रियाणि विशिष्टानि स्वादुव्यञ्जनानि पचानि किम् ?**

**पतिः - (आनन्देन) पचतु... पचतु... । भवत्याः वचनं श्रुत्वा एव मम मुखे जलम् आगतम् ।**

**पत्नी - आगतं खलु मुखे जलम्... ! ! तर्हि तदेव पिबतु ॥**

★ ★ ★ ★ ★

**वैद्यः - (नमनम् उद्दिश्य) एतत् उपनेत्रं कस्य कृते स्वीकुर्वन् अस्ति ?**

**नमनः - मम शिक्षकस्य कृते ।**

**वैद्यः - किन्तु किमर्थम् ?**

**नमनः - सः सर्वदा मां ‘भोः गर्दभ !’ इति उक्त्वा एव सम्बोधयति ।**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान्प्रति नैष यत्नः ।**
**उत्पत्स्यते तु मम कोऽपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी ॥**

**तात्पर्यम्** – ये केचन अस्माकं विषये अवज्ञां प्रकटयन्ति ते किं जानन्ति ? एषः प्रयत्नः तेषां कृते न। अग्रे कश्चन समानचिन्तकः आगच्छेत् यतः समयः सीमारहितः भूमिः विपुला च।

**यो ध्रुवाणि परित्यज्य अध्रुवं परिसेवते ।**
**ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥**

**तात्पर्यम्** – निश्चितं परित्यज्य अनिश्चितम् अन्विच्छन्तः यदि गच्छेम तर्हि निश्चितं हस्तच्युतं भवति। अनिश्चितं तु दूरे एव तिष्ठति।

**यो यस्य चित्ते वसति स सदूरे कदाचन ।**
**खे सूर्यः कमलं भूमौ दृष्ट्वेदं स्फुटति प्रियाः ॥**

**तात्पर्यम्** – यः यस्य हृदये निवसति सः कदापि तस्मात् दूरे न तिष्ठति। यद्यपि सूर्यः आकाशे अस्ति कमलं तु विकसितं भवति।

## ज्ञानसरित्

**श्यामः पटेलः**

### “इलेक्ट्रोनिक” – जगत्

विश्वस्य प्रत्येकस्मिन् कणे विद्युत् अस्ति एव । तस्याः विद्युतः प्रयोगैः वैज्ञानिकाः विद्युतः उपरि अङ्कुशं प्राप्तवन्तः । एतस्य उपक्रमस्य आरम्भः ग्रीसदेशे अभवत् । विद्युत् प्राकृतिकघटकः अस्ति इति प्रथमवारं ग्रीसजनाः एव जानन्ति स्म । अबनूस–काष्ठस्य यष्टिकायाः कौषेयवस्त्रेण सह घर्षणं भवति तदा सा यष्टिका पिच्छप्रभृति वस्तु आक्रष्टुं शक्नोति इति वार्ता तदा प्रचलिता आसीत् । ख्रीष्टाब्दस्य १६६० तमे वर्षे जर्मनवैज्ञानिक–ओटोवान–गेरिक–महोदयेन सल्फरद्रव्यस्य वस्त्रस्य च मिथः घर्षणात् विद्युत् उत्पादिता । तदनु १७४६ तमे वर्षे होलेन्डदेशस्य लीडननगरस्य वैज्ञानिकः पीटर–मर्थब्रोक–महोदयः एकस्मिन् पात्रे विद्युत्सङ्ग्रहं कृतवान् । तत् “लीडन–जार” नाम्ना प्रसिद्धं जातम् । प्रयोगानन्तरं सा एव “बेटरी” इत्यस्य पूर्वतनं स्वरूपम् । १७५२ तमे वर्षे फ्रेंकलीनमहोदयेन अन्वेषणं कृतं यत् या तडित् आकाशे दृश्यते, तथा या यन्त्रैः उत्पाद्यते – तयोः मध्ये ऐक्यमेव, न भिन्नता । १७८० तमे वर्षे लीगी–गेलवानी–महोदयः अन्वेषणं कृतवान् यत् मण्डूकस्य पादेषु विद्युत्प्रवाहः भवति । तदनन्तरं निश्चितं जातं यत् सजीवप्राणिषु अपि विद्युत् भवति । एलेसान्ड्री–वोल्टा–महोदयेन रसायणानां संयोगेन विद्युत् उत्पादिता । तेन एव धातुनिर्मित–पत्राणां लवणयुक्तजलस्य च संयोगेन विद्युत् उत्पादिता । सा एव प्रथमं बेटरी–यन्त्रम् । १८२०तमे वर्षे हेन्स–ओरस्टेड–महोदयः विद्युतः “मेग्नेटिक फील्ड” इत्यस्य गवेषणां कृतवान् । ततः ब्रह्माण्डीयविद्युत् तथा च “मेग्नेटिझम” इति प्रसिद्धं जातम् । तत्पश्चात् वैज्ञानिकानां संशोधनैः विद्युच्चालितानां यन्त्राणां प्रयोगैः च जगद् इदम् “इलेक्ट्रोनिक” इत्याख्यं युगं प्रविष्टम् ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **अनङ्गः** | कामदेव | god of love |
| **क्षत्रम्** | क्षत्रिय | a kshatriya |
| **स्नेहः** | स्नेह | love |
| **प्रियतमः** | प्रिय पुरुष | beloved (male) |
| **प्रियतमा** | प्रिय स्त्री | beloved (female) |
| **अनुरागः** | अनुराग | devotion |
| **सुमनाः** (सकारान्तं स्त्री.) | पुष्प | flower |
| **विबुधः** | देव | Deva |
| **विभावसुः** | सूर्य | Sun |
| **चक्राङ्गः** | हंस | swan |
| **वल्लभः** | प्रिय | dear |
| **कीरः** | शुक | parrot |
| **क्लान्त** | श्रान्त | fatigued |
| **स्पन्दनम्** | धड़कना | trembling |
| **दुर्बलः** | दुर्बल | weak |

## किं भवन्तः जानन्ति ?

**१ ) शिवः कस्मिन् पर्वते वसति ?**

(क) कैलासे (ख) महेन्द्रे (ग) किष्किंधायाम् (घ) गिरनारे

**२ ) पाण्डवानां जन्म कस्मिन् पर्वते जातः आसीत् ?**

(क) शतशृङ्गे (ख) महेन्द्रे (ग) गन्धमादने (घ) उशीरबीजे

**३ ) महर्षेः वाल्मीकेः आश्रमः कस्याः नद्याः तटे आसीत् ?**

(क) गङ्गायाम् (ख) तमसायाम् (ग) यमुनायाम् (घ) सरस्वत्याम्

**४ ) वनवाससमये रामःसर्वाधिकं समयं कुत्र यापितवान् आसीत् ?**

(क) चित्रकुटे (ख) भरद्वाजाश्रमे (ग) किष्किंधायाम् (घ) मतङ्गवने

**५ ) लङ्कानगरी कस्मिन् पर्वते स्थिता आसीत् ?**

(क) सुमेरौ (ख) गन्धमादने (ग) कैलासे (घ) त्रिकुटे

**६ ) 'रामशिला' कस्मिन् स्थाने वर्तते ?**

(क) गयायाम् (ख) प्रयागे (ग) काश्याम् (घ) हरिद्वारे

**७ ) 'जलियाँवाला बाग' कस्मिन् नगरे वर्तते ?**

(क) जम्मू (ख) अमृतसर (ग) अयोध्या (घ) नागपुर

उत्तराणि – (१) क (२) क (३) ख (४) क (५) घ (६) क (७) ख

## अस्माकम् आगामिकार्यक्रमा:


EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

**Online / Offline**

**Admission Open**

# संस्कृतभाषाशिक्षणम्

**First Level**

**Date :** 02/04/25 to 30/06/25
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

**Second Level**

**Date :** 02/04/25 to 30/06/25
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY
जयतु संस्कृतं जयतु भारतम्

**Learn Online**

# स्तोत्रपाठ:

( निश्चितानि स्तोत्राणि )

**Date :** 04/03/2025 to 18/03/2025
**Day :** Tuesday - Thursday
**Time :** 07:00 am to 8:30 am
**Fees :** Rs. 500/-

# छन्द:परिचय:

**Date :** 03/03/2025 to 24/06/2025
**Day :** Monday - Wednesday
**Time :** 06:30 pm to 8:00 pm
**Fees :** Rs. 2500/-

**Value Education Through Sanskrit**

# बालसंस्कृतवर्ग:

**(Class SKg to 8)**
**Offline**

**Date :** 01/02/2025 to 26/04/2025
**Day :** Saturday
**Time :** 06:00 pm to 7:30 pm
**Fees :** Rs. 2000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

संस्कृत-साम्प्रतम्

नमस्कार:

यदि भवन्त: "साम्प्रतम्" मासिकीपत्रिकाया: ग्राहका: भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु।

**ग्राहक शुल्कम्**

वार्षिकं रू – 100
द्वैवार्षिकं रू – 175
त्रैवार्षिकं रू – 250
अङ्कमूल्यं रू – 10


**प्रियवाचका:**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्या: लेखा:, कथा:, हास्यकणिका: वा सन्ति तर्हि कृपया प्रेषयन्तु।
- पत्रिकाया: विषये सूचनम् अपि स्वीकार्यम् अस्ति।


EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006